National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 209-212
© 2026 NJHSR
www.sanskritarticle.com

**गणेशमहतो**
शोधच्छात्रः,
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,
जवाहरलालनेहरूविश्वविद्यालयः,
नवदेहली ।

**सदानन्दः**
अतिथिसहायकाचार्यः,
संस्कृतसाहित्यविद्याशाखा,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी ।

**Correspondence:**
**गणेशमहतो**
शोधच्छात्रः,
संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,
जवाहरलालनेहरूविश्वविद्यालयः,
नवदेहली ।

# महाभाष्यकारस्य पतञ्जलेर्व्याख्यानपद्धतिः

**गणेशमहतो[1], सदानन्दः[2]**

व्याकरणशास्त्रस्य प्रयोजनमस्ति प्रकृतिप्रत्यययोगं विविच्य शब्दस्य मूलार्थावबोधनम् इति। निरुक्तशास्त्रस्य च प्रयोजनमस्ति शब्दार्थनिर्वचनद्वारा विशेषार्थपरिज्ञानम् इति। विशेषार्थश्च मूलभूतसामान्यार्थपरिज्ञानादृते न सम्भवति परिज्ञातुं, तस्मादेव निरुक्तकारः प्राह -

**नावैयाकरणाय निर्ब्रूयात् ।**[3]

अर्थात् यो व्याकरणं न जानाति, तस्मै निरुक्तप्रवचनं न कर्त्तव्यमिति। अनेन अर्थज्ञाने व्याकरणस्य प्राधान्यं स्पष्टतया शक्यतेऽवगन्तुम्। वेदशरीरस्यालङ्कारिकवर्णनप्रसङ्गे षडङ्गस्य भिन्नभिन्नशरीरावयवैस्तुलनाक्रियत । तत्रापि व्याकरणशास्त्रस्य मुख्यं प्रधानीभूतं स्थानं प्रतिपादितम् -

**मुखं व्याकरणं स्मृतम् ।**[4]

वाक्यपदीयकारो भर्तृहरिर्यथाऽऽह -

**न सोऽस्ति प्रत्ययो लोके यः शब्दानुगमादृते ।**
**अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते ।।**[5]

अर्थात् संसारे एतादृशः कोऽपि प्रत्ययः (ज्ञानं) नास्ति, यः शब्दानुगमादृते सम्भवति। यतः सर्वं ज्ञानं शब्देन अनुविद्धमिव भासते । एतदेव कारणं यस्मादानन्दवर्धनाचार्यो ध्वन्यालोके प्राह -

**प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम् ।**[6]

स्वयं महाभाष्यकारः पतञ्जलिश्चापि शब्दानुशासनस्य प्रयोजनं निरूपयन्नाह -

**"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति । प्रधानञ्च षट्स्वङ्गेषु व्याकरणम् । प्रधाने च कृतो यत्नः फलवान् भवति ।"**[7]

तदेतस्मिन् व्याकरणशास्त्रे कृतभूरिपरिश्रमाः अनेके आचार्याः अभवन्, सन्ति, भविष्यन्ति चाग्रे, परं व्याकरणशास्त्रपरम्परायां **त्रिमुनि व्याकरणस्य**[8] इति लोकप्रसिद्धिर्भृशमवलोक्यते, यथाहि शब्दार्थसम्बन्धं प्रतिपादयताऽऽचार्येण भर्तृहरिणाप्युक्तम् -

**नित्याः शब्दार्थसम्बन्धास्तत्राम्नाता महर्षिभिः ।**
**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभिः ।।**[9]

तत्रैतेषु अपि उत्तरोत्तरं मुनीनां प्रामाण्यमवधार्यते। तत्र कारणं भगवतः पतञ्जलेर्व्याख्यानकौशलमेव। संस्कृतवाङ्मये कतिपयभाष्यकाराः अभवन्, परं **महाभाष्यसंज्ञया** आचार्यपतञ्जलेरेव भाष्यं समाद्रियते। तत्र कानि कारणानि भाष्यस्य महाभाष्यभवने? का विशेषता पतञ्जलिमुनेर्व्याख्यानपद्धतेर्वा? इति शोधपत्रेऽस्मिन् विविधोदाहरणैः प्रस्तोष्यते पुरस्तात् । ततः पूर्वं भगवतः पतञ्जलेः सामान्यपरिचयं विद्मः।

## ➢ महाभाष्यकारो भगवान् पतञ्जलिः -

भगवान् पतञ्जलिः पाणिनीयव्याकरणे महाभाष्यं चकार। भगवतः पतञ्जलेः काले यावन्तोऽपि व्याकरणग्रन्थाः समुपलभ्यन्ते स्म, सर्वेषामेव तेषां मुनिरसौ स्वनिबन्धनेऽस्मिन् सारसंग्रहञ्चकार ।

पतञ्जलिनाम्नः कर्त्तृत्वं हि संस्कृतवाङ्मये अनेकेषां ग्रन्थानां समुपलभ्यते, परं कस्य-कस्य ग्रन्थस्य एककर्त्तृत्वं वर्त्तते ? इत्यत्र सर्वेषां विदुषां मतैक्यमपि न वर्त्तते ।

प्रथमं तु महाभाष्यकारेण कुत्रचिदपि स्वग्रन्थे स्पष्टरूपेण स्वपरिचयो न दत्तः, अपरतश्च महाभाष्यमिदं सम्प्रति यावत्कतिपयवारं विलोपमप्यगात्।[10] अतः महाभाष्यकारस्य स्पष्टस्वरूपनिरूपणे कश्चिदपि न तावत्समर्थोऽभवत्। महाभाष्यकार-स्वरूपनिरूपण-प्रसङ्गेऽत्र कश्चित्पार्ष्णिमात्रं, कश्चिज्जानुमात्रं, कश्चि-दुरुमात्रं, कश्चित्कक्षमात्रं कश्चिच्च स्कन्धमात्रमेव ह्रद इव पारितवान्। समाननामधारिणो हि लोके अनेके पुरुषाः भवन्ति, तेषु कदाचित्कालसाधर्म्यं कदाचिच्च कालवैधर्म्यमवलोक्यते, तत्र स्पष्टपरिचयाभावे "अयमेव" इति स्पष्टतया शक्योऽवक्तुम्। तत्र समुपलब्धविभिन्नप्राचीनग्रन्थेषु वर्णनाधारेण कतिपयनामभिस्तत्र-भवान् पतञ्जलिः स्मर्यते, तद्यथा - **१. गोनर्दीयः २. गोणिकापुत्रः ३. नागनाथः ४. अहिपतिः ५. फणिभृत् ६. शेषराजः ७. शेषाहिः ८. चूर्णिकारः ९. पदकारश्चे**त्यादिनामभिः ।[11]

एवमेवास्य देशनिर्धारणेऽपि समस्या वर्त्तते, कश्चिद् **गोनर्दवासी,** कश्चित् **कश्मीरवासी,** कश्चिच्चैनं **पाटलिपुत्रवासी** इति अमन्यत । तत्र सर्वैर्निर्धारकैर्विभिन्नास्तर्काः समुपस्थापिताः. तत्र समेषां विवेचनं सूक्ष्मेक्षिकया दर्शनान्ते ममापि **संस्कृतव्याकरणशास्त्रस्येतिहासकर्त्रा महामहोपाध्यायेन पं. युधिष्ठिरमीमांसकेन** सहैव साम्यं गच्छति, यतः प्राचीनग्रन्थानां कतिपयवारं परिष्कारः सञ्जातः इति अन्यग्रन्थैरपि स्पष्टीभवति, तथा च पाश्चात्त्यविद्वद्भिस्तदनुसारिभिश्चात्रत्यैरपि येन केनापि कारणेन भवतु सम्पूर्णभारतीयवाङ्मयं, भारतीयसंस्कृर्तिं, भारतीयसभ्यताञ्च निश्चितपरिमाणे एव सीमयितुं प्रयासो विहितः। समुपलब्धप्रमाणेष्वपि ततः पूर्व (पाश्चात्त्यनिर्धारितपरिमाणात्पूर्वं) गन्तुं नेहन्ते ते, यश्च प्रयतते स अतिवादीति कथ्यते तैः ।

अतएव महाभाष्यकारः २००० वि.पू. - १२०० वि.पू. कालिकः[12] एव इति मे मतमपि । भगवतो महाभाष्यकारस्य समानकर्त्तृकत्वमपि सम्प्रति यावत् अनिश्चितमेव, यतः प्रागेव प्रतिपादितं यत्कश्चित्स्पष्टनिर्देशो भगवता स्वयं न कृतः।

## ➢पातञ्जलमहाभाष्यम् -

पातञ्जलमहाभाष्यं व्याकरणशास्त्रस्यात्यन्तं प्रामाणिकग्रन्थो वर्त्तते। अस्य लेखनशैली अत्यन्तं मनोरमा वर्त्तते । यद्यपि ग्रन्थोऽयं व्याकरणेन सह सम्बद्धस्तथापि समस्तविद्यानामाकररूपेण विद्वद्भिर्मन्यते, यथाहि भर्त्तृहरिणाप्युक्तम् -

**कृतेऽथ पतञ्जलिना गुरुणा तीर्थदर्शिना ।**
**सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने ॥**[13]

अस्य पातञ्जलमहाभाष्यस्य एतावति सुदीर्घकालेऽनेकवारं पठनपाठनपरम्परायाः उच्छेदो जातः । त्रिवारमस्य लोपो वर्ण्यते ऐतिह्यविद्भिः । तत्र प्राथम्येन भर्त्तृहरिवचसैव ज्ञायते -

**बैजिसौभवहर्यक्षैः शुष्कतर्कानुसारिभिः ।**
**आर्षे विप्लाविते ग्रन्थे संग्रहप्रतिकञ्चुके ।।**
**यः पतञ्जलिशिष्येभ्यो भ्रष्टो व्याकरणागमः ।**
**काले स दाक्षिणात्येषु ग्रन्थमात्रे व्यवस्थितः।।**
**पर्वतादागमं लब्ध्वा भाष्यबीजानुसारिभिः।**
**स नीतो बहुशाखत्वं चन्द्राचार्यादिभिः पुनः ॥**[14]

कल्हणानुसारं चन्द्राचार्येण महाराज्ञः अभिमन्योरादेशान्महाभाष्य-मुद्धृतम्।[15]

कल्हणस्य राजतरङ्गिण्या एव ज्ञायते यद्विक्रमस्य अष्टमशताब्द्यां महाभाष्यस्य प्रचारः पुनर्नष्टः, तदा महाराजो जयापीडः क्षीरसंज्ञकमनीषिणं देशान्तरादाहूय पुनरस्य प्रचारं कारितवान् -

**देशान्तरादागमय्याथ व्याचक्षाणान् क्षमापतिः।**
**प्रावर्त्तयत विच्छिन्नं महाभाष्यं स्वमण्डले ।।**[16]

तृतीयवारं पुनरस्य पठनपाठनं स्थगितं कौमुदीशेखरादीनां महता प्रभावेण, परं विदुषां विरजानन्ददण्डिस्वामिनां तच्छिष्याणाञ्च परिश्रमेण पुनर्विद्वन्निकायेऽस्य प्रचारः सञ्जातः।

## ➢महाभाष्यकारस्य व्याख्यानपद्धतिः –

_महाभाष्यकारस्य पतञ्जलेर्व्याख्यानपद्धतिरतीव हृद्या सुगमा च वर्त्तते। आख्यानोपाख्यानैः, लौकिकन्यायैः, ऐतिह्यघटनाभिः, संवाद-शैल्या, निर्वचनव्याख्यानादिभिः प्रकारैर्विभूषितोऽयं ग्रन्थो लभते विशेषसम्मानं विद्वन्निकाये। स्वयं भगवता पतञ्जलिना व्याख्यान-पदमाख्यातं पस्पशाह्निके– **"ननु चोक्तम् - न केवलानि चर्चापदानि व्याख्यानम् – वृद्धिः आत् ऐच् इति। किं तर्हि ? उदाहरणं प्रत्युदाहरणं वाक्याध्याहारः इत्येतत्समुदितं व्याख्यानं भवतीति ।"**

महाभाष्ये कतिपयविषयाणामवबोधाय आख्यानोपाख्यानादीनामपि प्रयोगो व्यधायि भगवता पतञ्जलिना, तद्यथा - शब्दोपदेशे किं प्रतिपदपाठः कर्त्तव्यः ? इत्येतमवबोधयितुं बृहस्पति-इन्दर्योराख्यानं समुपस्थापयति सः –

**"अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः । एवं हि श्रूयते - 'बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं प्रतिपदोक्तानां शब्दपारायणं प्रोवाच, नान्तं जगाम।' बृहस्पतिश्च प्रवक्ता, इन्द्रश्चाध्येता, दिव्यं वर्षसहस्रमध्ययनकालो न चान्तं जगाम । किं पुनरद्यत्वे ? यः सर्वथा**

**चिरं जीवति, वर्षशतं जीवति ॥ चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति - आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेनेति। तत्र चास्यागमकालेनैवायुः कृत्स्नं पर्युपयुक्तं स्यात् । तस्मादनभ्युपायः शब्दानां प्रतिपत्तौ प्रतिपदपाठः ।"**[17]

महाभाष्यस्याध्ययनेन ज्ञायते यद् भाषिकपरिवर्त्तनानि भगवान् पतञ्जलिः जानाति स्म, तस्य ज्ञानस्य चोल्लेखं पदे-पदे कृतवानसौ भाष्ये। यथा - पस्पशाह्निके शब्दप्रयोगं निरूपयता तत्रभवता निदर्शितम् - **"एतस्मिंश्चातिमहति शब्दस्य प्रयोगविषये ते ते शब्दास्तत्र तत्र नियतविषयाः दृश्यन्ते । तद्यथा - शवतिर्गतिकर्मा कम्बोजेष्वेव भाषितो भवति । विकार एवैनमार्या भाषन्ते शव इति । हम्मतिः सुराष्ट्रेषु, रंहतिः प्राच्यमगधेषु । गमिमेव त्वार्याः प्रयुञ्जते । दातिर्लवनार्थे प्राच्येषु, दात्रमुदीच्येषु।"**[18]

कतिपयत्र तु शब्दैरेव शब्दानाचष्टे, कतिपयत्र च निर्वचनसिद्धान्तमाश्रयते। कतिपयत्र प्रमाणत्वेन शास्त्रापेक्षया लोकमुपस्थापयति परमप्रमाणत्वेन, चेत्कतिपयत्र लौकिकन्यायैर्विषयं सुस्पष्टीकरोति । तद्यथा - **भूवादयो धातवः**[19] इति सूत्रभाष्ये शब्दैरेव शब्दानां निष्पत्तिं बोधयति - **"क्रियावचनो धातु रित्येतल्लक्षणं क्रियेत ? का पुनः क्रिया ? ईहा । का पुनरीहा ? चेष्टा । का पुनश्चेष्टा ? व्यापारः । सर्वथा भवाञ्छब्देनैव शब्दानाचष्टे न किञ्चिदर्थजातं निदर्शयत्येवंजातीयिका क्रियेति ।"**

तत्रैव व्याकरणस्याध्ययनस्यावान्तरप्रयोजनकथनप्रसङ्गे **"सक्तुमिव"** इति मन्त्रं बोधयता निर्वचनपद्धतिमनुसरति । यथा – **"सक्तुः सचतेर्दुर्धावो भवति, कसतेर्वा विपरीताद् विकसितो भवति । तितउ परिपवनं भवति । ततवद्वा तुन्नवद्वा ।"**[20]

लौकिकन्यायैर्व्यवहारैश्च प्रायः सर्वत्रैव महाभाष्ये स्वमतस्य परिपोषणं प्रकृतविषयस्य च स्पष्टीकरणं दर्शयत्येव तत्रभवान् पतञ्जलिः। पस्पशाह्निक एव शब्दापशब्दयोरुपदेशनिरूपणप्रसंगे **कूपखानकन्यायेन** स्वमतं परिपोषयति, यथा –

**"अथवा कूपखानकवदेतद् भविष्यति। तद्यथा - कूपखानकः कूपं खनन् यद्यपि मृदा पांसुभिश्चावकीर्णो भवति । सोऽप्सु संजातासु तत एव तं गुणमासादयति । येन च स दोषो निर्हण्यते, भूयसा चाभ्युदयेन योगो भवति । एवमिहापि यद्यप्यपशब्दज्ञानेऽधर्मः तथापि यस्त्वसौ शब्दज्ञाने धर्मस्तेन च स दोषो निर्घानिष्यते, भूयसा चाभ्युदयेन योगो भविष्यति ।"**[21]

आलङ्कारिकशैल्या अपि पूर्वाचार्यसमतुल्यमेव बहुधा विषयो वर्ण्यते आचार्येण महाभाष्ये, यथा - व्याकरणाध्ययनस्य प्रयोजन-निरूपणप्रसङ्गे **"चत्वारि शृङ्गा त्रयो अस्य पादाः"** इत्यादिमन्त्राणां व्याकरणपरकविवेचनमत्र निदर्शनभूतम् । एवमेव संवादशैल्या अपि प्रायशः प्रयोगो दृश्यत एव । यथा - **अजेर्व्यघञपोः**[22] इत्येतस्य सूत्रस्य भाष्ये **प्रवेता, प्राजिता** इत्येतयोः शब्दयोर्विभेदं वर्णयन्नाह –

**"एवं तर्हि नार्थ उपसंख्यानेन नापि घञपोः प्रतिषेधेन । इदमस्ति चक्षिङः ख्याञ्,**[23] **वा लिटि**[24] **इति । ततो वक्ष्यामि - अजेर्वी भवति वा व्यवस्थितविभाषा चेति । तेनेह च भविष्यति प्रवेता प्रवेतुं प्रवीतो रथः संवीतिरिति । इह च न भविष्यति समाजः उदाजः समजः उदजः समजनम् उदजनं समज्येति। तत्रायमप्यर्थ इदमपि सिद्धं भवति प्राजितेति। किञ्च भोः इष्यत एतद्रूपम्? बाढमिष्यते। एवं हि कश्चिद्वैयाकरण आह - कोऽस्य रथस्य प्रवेतेति। सूत आह - आयुष्मन्नहं प्राजितेति । वैयाकरण आह – "अपशब्द" इति। सूत आह - प्राप्तिज्ञो देवानां प्रियो न त्विष्टिज्ञ इष्यत एतद्रूपमिति। वैयाकरण आह – आहो खल्वनेन दुरुतेन बाध्यामह इति। सूत आह - न खलु वेञः सूतः सुवतेरेव सूतः । यदि सूवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति वक्तव्यम् ।"**

एवं वैयाकरणसूतसंवादमाध्यमेनात्र इष्टं निरूपयामास। तथा तु सम्पूर्णमहाभाष्यमेव प्रतीयते ह्येवं यत्संवादो जातः केषाञ्चिन्मध्ये, अत एव बहुभिरनेकविधकिम्वदन्तयोऽपि प्राचाल्यन्त एतद्विषये । परं काव्यमीमांसाकारो राजशेखरो भाष्यं लक्षयति -

**आक्षिप्य भाषणाद्भाष्यम्**[25] इति ।

तथा च व्याख्यानपदं लक्षयतापि केनाप्युक्तं विदुषा -

**पदच्छेदः पदार्थोक्तिर्विग्रहो वाक्ययोजना।**
**आक्षेपोऽथ समाधानं व्याख्यानं षड्विधं भवेत् ।।**[26]

अतः ज्ञायते यद्भाष्यं तु आक्षेपसमाधानपूर्वकमेव भवति, इदञ्च पुनस्तत्र महाभाष्यमेव ।

महाभाष्ये पदे-पदे ऐतिह्यमपि लक्ष्यते, येषामाधारेण विद्वद्भिर्महाभाष्यकारस्य पतञ्जलेः कालनिर्णयोऽपि क्रियते । तथा चानेन ऐतिह्यज्ञानमपि भवति, यथा - **जीविकार्थे चापण्ये**[27] इतिसूत्रभाष्ये मूर्त्तिपूजाविषयकं किञ्चिदुपस्थाप्यते –

**"अपण्ये इत्युच्यते तत्रेदं न सिद्ध्यति – शिवः स्कन्दः विशाख इति। किं कारणम्? मौर्यैर्हिरण्यार्थिभिरर्च्चाः प्रकल्पिताः। भवेत्तासु न स्यात्, यास्त्वेताः सम्प्रति पूजार्थास्तासु भविष्यति।"**

अत्र हिरण्यार्थिभिर्मौर्यैः अर्चाः प्रकल्पिताः इत्येतन्निरूपितम् । एवमेव **अनुर्यत्समया**[28] इति सूत्रभाष्ये **"अनुशोण पाटलिपुत्रम्"** इत्युच्यते, तत्तथाधुना न, यतः साम्प्रतिकं पाटलिपुत्रं तु **"अनुगङ्गं"** दृश्यते ।

अनेनान्यमपि पाटलिपुत्राभिधं किञ्चिन्नगरमासीत्तदा यदधुना न तथा, अथवा पाटलिपुत्रस्य सीमा शोणनदीं यावदासीत्तस्मिन्काले यन्न साम्प्रतं तथा । एवमेवान्यान्यप्युदाहरणानि महाभाष्याध्ययनप्रसङ्गे पाठकानां दृष्टिपथमायान्ति ।

एवम्प्रकारेण वीक्ष्यते चेद्भर्तृहरिवचः **"सर्वेषां न्यायबीजानां महाभाष्ये निबन्धने"** इत्येतत्सार्थकतामेव भजते। वस्तुतो महाभाष्यकारेण भगवता पतञ्जलिना स्वविशिष्टप्रतिभया निबद्धोऽयं ग्रन्थः सर्वविद्यानामाकरः कृतः। अस्योत्तमव्याख्यानपद्धतिरेवेदं सर्वभाष्येषु महाभाष्यं निर्माति । सम्पूर्णमहाभाष्ये लोकः एव केन्द्रे स्थितः। मीमांसाभाष्यकारः शबरस्वामी अपि स्वभाष्यारम्भे लोकप्रसिद्धिमेव प्रमाणत्वनोपस्थापयति । अन्ते चैतावदेव यद्विद्वद्भिः कृतं भाष्यलक्षणमिदमत्र सम्पूर्णतया संघटते -

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।**

**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः।।** इति ॥

स्थालिपुलाकन्यायेन कैश्चिदुदाहरणैरत्र महाभाष्यस्य व्याख्यान-पद्धतिरत्र प्रस्तुता, विशेषतस्तु महाभाष्यावलोकनेनैव शक्यते अवगन्तुम् ।

**सन्दर्भग्रन्थसूची -**


१. संस्कृत व्याकरणशास्त्र का इतिहास (प्रथमभाग); युधिष्ठिर मीमांसक, भारतीयप्राच्यविद्याप्रतिष्ठान, रामगंज, अजमेर, द्वितीय संस्करण, २०२० वि.सं. ।

२. व्याकरण-महाभाष्यम् (प्रथम-द्वितीयभाग), पतञ्जलिः, पं. वेदव्रतवर्णी, हरियाणासाहित्यसंस्थानम्, गुरुकुल झज्जर, रोहतक, प्रथम संस्करण, २०२० वि.सं. ।

३. वाक्यपदीयम्, ब्रह्मकाण्डम्, भर्तृहरिः, पं. रघुनाथ शर्मा, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, तृतीयसंस्करणम्, २०४५ वि.सं. ।

४. काव्यमीमांसा, राजशेखर, डा. गंगासागर राय, चौखम्बा विद्याभवन, वाराणसी, सं. २०१३ ।

५. पाणिनीय शिक्षा, पाणिनि, श्रीनारायणमिश्र, चौखम्भा पब्लिशर्स, वाराणसी ।

६. अष्टाध्यायीसूत्रपाठः, पाणिनिः, ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, रेवली ।

७. काशिका, वामनजयादित्यौ, डा. जयशङ्करलाल त्रिपाठी, डा. सुधाकर मालवीय, तारा प्रिंटिंग वर्क्स, वाराणसी ।


**पाद टिप्पणी -**

[1] शोधच्छात्रः, संस्कृतप्राच्यविद्याध्ययनसंस्थानम्,जवाहरलालनेहरू - विश्वविद्यालयः, नवदेहली ।

[2] अतिथिसहायकाचार्यः, संस्कृतसाहित्यविद्याशाखा, केन्द्रीयसंस्कृतविश्व-विद्यालयः, श्रीसदाशिवपरिसरः, पुरी ।

[3] निरुक्तम् – २/१

[4] पाणिनीयशिक्षा - ४२

[5] वाक्यपदीयम्, ब्रह्मकाण्डम् – ११४ कारिका

[6] ध्वन्यालोकः – १/१३ (वृत्तिभागः)

[7] पातञ्जलमहाभाष्यम्, पस्पशाह्निकम् ।

[8] संख्या वंश्येन; काशिका - २/१/१८

[9] वाक्यपदीयम्, ब्रह्मकाण्डम् - २३

[10] संस्कृत व्याकरणशास्त्र का इतिहास, पृ. - ३३१

[11] संस्कृत व्याकरणशास्त्र का इतिहास, पृ. - ३११

[12] संस्कृत व्याकरणशास्त्र का इतिहास. पृ. - ३२७

[13] वाक्यपदीयम् – २/४८६

[14] वाक्यपदीयम् – २/४८७ -४८९

[15] राजतरङ्गिणी - १/१७६

[16] राजतरङ्गिणी – ४/४८८

[17] पातञ्जलमहाभाष्यम्, पस्पशाह्निकम्

[18] सर्वे देशान्तरे – पात. महा. पस्पशाह्निकम्

[19] पात. महा. – १/३/१

[20] सक्तुमिव - पात. महा. पस्पशाह्निकम्

[21] शास्त्रपूर्वके प्रयोगे ऽभ्युदयस्तत्तुल्यं वेदशब्देन - पात. महा. पस्पशाह्निकम्

[22] अजेर्व्यघञपोः - पात. महा. – २/४/५६

[23] अष्टाध्यायी – २/४/५४

[24] अष्टाध्यायी – २/४/५५

[25] काव्यमीमांसा - द्वितीयोऽध्यायः

[26] पारिभाषिकः - १

[27] पात. महा. – ५/३/९९

[28] पात. महा. – २/१/१४